# ६ नगराणि वणिजः शिल्पिजनाः च



कश्चन यात्री कस्यचित् एकस्य मध्यमयुगस्य नगरस्य यात्रां कर्तुम् आगतः अस्ति । तस्य नगरस्य विषये कीदृशीः आकाङ्क्षा स्वमनसि स्थापयिष्यते ? एषः विषयः एतस्मिन् तथ्ये आश्रितः भवति यत् तत् नगरं कथंविधम् आसीत्, किं तत् मन्दिरनगरम् आसीत् अथवा प्रशासनिककेन्द्रम् आसीत्, किञ्चन वाणिज्यिकं नगरं, किञ्चन पत्तननगरम् अथवा किञ्चित् अन्यप्रकारकं नगरम् आसीत् । वस्तुतः अनेकानि नगराणि युगपदेव अनेकप्रकारकाणि आसन् यथा - तानि प्रशासनिकनगराणि तथा च मन्दिरनगरैः सह एव वाणिज्यिककार्यकलापानाम् अपि च शिल्पोत्पादनस्य केन्द्राणि अपि आसन् ।




मानचित्रम् – १

मध्ये दक्षिणे च भारते वाणिज्यस्य शिल्पकार्यस्य कानिचन प्रमुखकेन्द्राणि ।

## प्रशासनिककेन्द्राणि

द्वितीये अध्याये भवन्तः चोलवंशस्य विषये पठितवन्तः। आगच्छन्तु, वयं स्वकल्पनाधारेण चोलराज्ञां राजधान्याः तंजावूरस्य यात्रां कर्तुं चलामः यथा सा सहस्रं वर्षेभ्यः पूर्वम् आसीत्। वर्षे द्वादशमासेषु प्रवहणशीला कावेरीनदी एतस्य सुन्दरनगरस्य पार्श्वतः प्रवहति।

राजा राजराजचोलद्वारा निर्मितस्य राजराजेश्वरमन्दिरस्य घण्टाः नुदन्तः श्रूयन्ते । जनाः नगरस्य वास्तुकारस्य कुंजरमल्लनराजराजपेरूथच्चनस्य वास्तुकलायाः प्रशंसां कुर्वन्तः श्रान्ताः न भवन्ति। वयं वास्तुकारस्य नाम एतदर्थं जानीमः यतोहि सः गर्वेण स्वकीयं नाम मन्दिरस्य भित्तौ उत्कीर्णवान्। मन्दिरस्य अन्तः किमपि एकं विशालं शिवलिङ्गं स्थापितम् अस्ति।

एतत् मन्दिरम् अतिरिच्य नगरे अनेके राजप्रसादाः सन्ति, येषु अनेके मण्डपाः निर्मिताः सन्ति। राजानः एतेषु मण्डपेषु राजसभाः कुर्वन्ति स्म। इतः एव ते स्वस्य अधीनस्थजनानां कृते आदेशान् प्रेषयन्ति। नगरे सैन्यशिबिराणि अपि निर्मितानि सन्ति।

नगरं तेषां विपणिनां क्रियाकलापैः पूरितम् अस्ति, यत्र अन्नस्य उपस्कराणां वस्त्राणाम् आभूषणानां विक्रयणं जायमानम् अस्ति। नगरस्य कृते जलस्य आपूर्तिः कूपेभ्यः तडागेभ्यः च भवति । तंजावूरस्य तस्य च निकटवर्तिनगरस्य उरैयूरस्य सालीयतन्तुवायाः मन्दिरस्य उत्सवस्य कृते ध्वजं निर्मातुं वस्त्रं राज्ञः अभिजातवर्गस्य च कृते उत्तमं कार्पसिकवस्त्रं जनसाधारणस्य च कृते स्थूलं कार्पासिकं वस्त्रं निर्मान्तिः सन्ति। इतः नातिदूरे स्वामीमलायी इत्यस्मिन् स्थपतयः अथवा मूर्तिकाराः उत्तमानां कांस्यप्रतिमानां उन्नतानां सुन्दराणां घण्टा- धातु-दीपकानां निर्माणं कुर्वन्तः सन्ति न।

भवतां मते जनाः तंजावूरम् एकं महत् नगरम् अस्ति इति किमर्थम् मन्यन्ते स्म ?

## *मन्दिरनगरं तीर्थकेन्द्रं च*

तंजावूरः कस्यचित् मन्दिरनगरस्य अपि उदाहरणम् अस्ति। मन्दिरनगराणि नगरीकरणस्य एकम् अत्यन्तं महत्त्वपूर्णं प्रतिरूपं प्रस्तुवन्ति । नगरीकरणं नगराणां विकासस्य प्रक्रिया अस्ति मन्दिराणि प्रायः समाजस्य अर्थव्यवस्थायाः च कृते एव अत्यन्तं महत्त्वपूर्णानि भवन्ति स्म । शासकाः विभिन्नदेवी-देवाताः प्रति स्व-भक्तिभावं प्रदर्शयितुं मन्दिराणि निर्मापयन्ति स्म । ते मन्दिराणां कृते भूमिं धनं च अनुदानरूपेण यच्छन्ति स्म । येषां आयमाध्यमेन धार्मिकानुष्ठानानि विधिविधानेन सम्पन्नानि क्रियन्ते स्म, तीर्थयात्रिणः पुरोहितान् पण्डितान् च भोजयन्ति स्म पर्वोत्सवाः च आयोज्यन्ते स्म । मन्दिरस्य दर्शनार्थिनः अपि दानदक्षिणां च यच्छन्ति स्म।

**कांस्यम्, घण्टा-धातुः, “लुप्तमोम” कौशलम्**

कांस्यं कश्चन मिश्रधातुः भवति, ताम्रस्य राङ्गा च इति धातुद्वयमेलनेन निर्मितं भवति । घण्टाधातौ रांगा इत्यस्य अनुपातं कस्यापि अन्यप्रकारस्य कांस्यतः अधिकं भवति । अयं घण्टाध्वनिवत् ध्वनिम् उत्पादयति । चोलकालिकाः कांस्यप्रतिमाः (द्वितीये अध्याये पश्यन्तु) “लुप्तमोम” इति शैल्या निर्मीयन्ते स्म । अस्य प्रविधेः अन्तर्गतं सर्वप्रथमं सिक्थस्य एका प्रतिमा निर्मीयते स्म । एतां स्निग्धमृत्तिकया सम्पूर्णतया लेपयित्वा शोषणस्य कृते त्यज्यते स्म । यदा सा सर्वथा शुष्का भवति स्म तदा सा उष्णीक्रियते स्म अपि च तस्याः मृत्तिकायाः आवरणे एकं लघुच्छिद्रं कृत्वा तस्य छिद्रस्य माध्यमेन सम्पूर्णं लयप्राप्तं सिक्थं बहिः निष्कास्यते स्म । पुनः स्निग्धमृत्तिकायाः रिक्ते प्रतिरूपे तच्छिद्रद्वारेणैव विलयप्राप्तधातुः पूर्यते स्म । यदा सः धातुः शीतलीभूय ठोसभावम् अर्थात् दृढताम् उपयाति स्म तदा स्निग्धमृत्तिकायाः आवरणं सावधानतया अपसार्यते स्म अपि च ततः निष्कासितप्रतिमां स्वच्छीकृत्य दीप्तियुक्तां कुर्वन्ति स्म ।

? भवतां विचारानुसारम् अस्य प्रविधेः प्रयोगस्य के के लाभाः आसन् ?



*चित्रम् - १ कांस्यप्रतिमा , यस्यां श्रीकृष्णः नागराक्षसं कालियां नियन्त्रीकुर्वन् दर्शितः अस्ति ।*

मन्दिरस्य कार्यकर्तारः मन्दिरस्य धनं वाणिज्ये अर्थव्यवसाये च नियोजयन्ति स्म । शनैः शनैः कालक्रमेण, महत्यां सङ्ख्यायां पुरोहिताः अर्चकाः कर्मकराः शिल्पिनः व्यापारिणः इत्यादयः मन्दिरस्य तस्य दर्शनार्थिनां तीर्थयात्रिणां च आवश्यकताः पूरयितुं मन्दिरस्य समीपस्थेषु स्थानेषु वासम् आरब्धवन्तः । अनेन प्रकारेण मन्दिरनगराणां विकासः अभवत् । अनया रीत्या मन्दिराणां परितः अनेकेषां नगराणाम् आविर्भावः अभवत् । यथा मध्यप्रदेशे भिल्लस्वामिनः गुर्जरे च सोमनाथस्य । कानिचन अन्यानि महत्त्वपूर्णानि मन्दिरनगराणि तमिलनाडुराज्ये कांचीपुरं मदुरै तथा च आन्ध्रप्रदेशे तिरुपतिः च सन्ति ।

तीर्थस्थलानि अपि शनैः शनैः नगररूपेण विकसितानि जातानि । वृन्दावनम् (उत्तर-प्रदेशः) तिरुवन्नमलायी इति (तमिलनाडुः) एतादृशाणां नगराणां द्वे उदाहरणे स्तः । अजमेरः (राजस्थानम्) द्वादशशताब्द्यां चौहानराज्ञां राजधानी आसीत् अपि च कालक्रमेण मुगलानां शासने सा “सूबा” मुख्यालयः अभवत् । इदं नगरं धार्मिकसहास्तित्वस्य एकम् उत्कृष्टम् उदाहरणं प्रस्तौति । सुप्रसिद्धः सूफी-संत-ख्वाजा-मुयीनुद्दीन-चिश्तीवर्यः अत्र द्वादशशताब्द्यां निवासं कृतवान् । अपि च तस्य दर्शनार्थिनः श्रद्धालवः च सर्वेषां सम्प्रदायानां भवन्ति स्म । अजमेरस्य समीपे एव पुष्करसरोवरः अस्ति, यत्र प्राचीनकालात् एव तीर्थयात्रिणः आगच्छन्ति ।

? स्वस्य जनपदस्य नगराणां सूचीं कुर्वन्तु अपि च प्रशासनिककेन्द्राणां मन्दिरनगराणां तीर्थकेन्द्राणां च रूपेण तेषां वर्गीकरणं कुर्वन्तु ।

## लघुनगराणां संजालम्

अष्टमशताब्द्याः एव उपमहाद्वीपे अनेकेषां लघुनगराणां संजालं विस्तारं गच्छति स्म। संभवतः तेषां प्रादुर्भावः बृहद्-ग्रामेभ्यः जातः आसीत् । तेषु सामान्यतया एका मण्डपिका भवति स्म । पश्चात् सा एव मण्डपिका मण्डी इति उच्यते स्म । यत्र समीपस्थाः ग्रामवासिनः स्वस्य उत्पादान् विक्रेतुम् आनयन्ति स्म । तासु एतादृश्यः वीथ्यः आसन् यत्र आपणाः विपण्यः च आसन् ये हट्ट इति उच्यन्ते स्म । एतदतिरिच्य विभिन्नप्रकारकाणां कर्मकराणां तथा च शिल्पिणां यथा कुम्भकाराणां तैलिनां शर्करानिर्मातॄणां ताडी-निर्मातॄणां स्वर्णकाराणां काष्ठकाराणां लौहकाराणां पाषाणकर्मकराणां च पृथक् पृथक् विपण्यः भवन्ति स्म । केचन वणिजः तु स्थायीरूपेण नगरे स्थित्वा स्वकीयं कार्यं कुर्वन्ति स्म, परन्तु केचन अन्ये व्यापारिणः प्रतिनगरं भ्रमित्वा क्रयणं विक्रयणं च कुर्वन्ति स्म । पार्श्वस्थाः दूरस्थाः च वणिजः एतेषु नगरेषु स्थानीयम् उत्पादनं क्रेतुम् अपि च दूरवर्तिनां स्थानानाम् उत्पादान् यथा घोटकाः, लवणं कर्पूरः केसरः पानं पुगीफलं कृष्णमरीचिका इति एतादृशान् उपस्कारान् विक्रेतुम् आगच्छन्ति स्म ।

*चित्रम् – २*

*नगरस्य एका विपणिः*



सामान्यरूपेण कश्चित् प्रान्ताधिपतिः अर्थात् परवर्तिकालस्य भूस्वामी एतेषु नगरेषु अथवा एतेषां नगराणां नातिदूरे दुर्गस्य आकारसदृशं महालयं रचयति स्म । एतादृशाः प्रान्ताधिपतयः वणिजां शिल्पकाराणां तेषां वाणिज्य-वस्तुषु च करस्य निर्धारणं कुर्वन्ति स्म अपि च कदाचित् एतेषां कराणां सङ्ग्रहणस्य "अधिकारं" तेभ्यः स्थानीयमन्दिरेभ्यः यच्छन्ति स्म, येषां निर्माणं स्वयं तैः अथवा धनाढ्यैः वणिग्भिः कारितं भवति स्म । एतादृशानाम् अधिकाराणाम् उल्लेखः अभिलेखेषु कृतः अस्ति ये अद्य अपि उपलभ्यन्ते ।



***चित्र* – ३ *काष्ठे विलेखयन् कश्चन काष्ठकारः***

**विपणिषु कराधानम्**

अयं राजस्थानतः प्राप्तस्य कस्यचित् दशमशताब्द्याः अभिलेखस्य सारांशः अस्ति । यस्मिन् तानि शुल्कानि दत्तानि सन्ति यानि मन्दिरप्राधिकारिभिः वस्तुरूपेण स्वीकर्तुं शक्यन्ते । शर्करायां गुडे, वर्णे, सूत्रेषु, कार्पासे, नारिकेलेषु, लवणे, पूगफले, तिलतैले वस्त्रे च करस्य निर्धारणं क्रियते स्म । एतदतिरिच्य वणिग्क्षु, धातुसम्बद्धवस्तुविक्रेतृषु, आसवकेषु, तैले, पश्वाहारे, अन्नस्य च गोणिषु अपि करस्य निर्धारणं भवति स्म ।
एतेषु कानिचन राजस्वानि तु वस्तुरूपेण कानिचन अन्यानि च साक्षात् धनरूपेण स्वीक्रियन्ते स्म ।

? अद्य विपणिषु संस्थापितानां कराणां विषये आधिक्येन ज्ञानं प्राप्नुवन्तु, एतान् कः सङ्गृह्णाति, ते कथं स्वीक्रियन्ते अपि च तेषां प्रयोगः कस्य कार्यस्य कृते भवति ।

## *महान्तः लघुवणिजः च*

वणिजः अनेकधा भवन्ति स्म । तेषु यायावराः (सप्तमे अध्याये पश्यन्तु) अपि सम्मिलिताः आसन् । केचन वणिजः विशेषरूपेण अश्वानां वणिजः स्वस्य सङ्घान् रचयन्ति स्म येषाम् एकः प्रमुखः भवति स्म अपि च सः प्रमुखः तेषां पक्षतः अश्वक्रयणस्य इच्छुकैः योद्धृभिः सह वार्तां करोति स्म । यतोहि वणिजः अनेकराज्येभ्यः वनप्रदेशेभ्यः च गन्तव्यं भवति स्म । अतः ते सामान्यतया समूहान् कृत्वा यात्रां कुर्वन्ति स्म अपि च स्वस्य हितानां रक्षार्थं वणिक्सङ्घान् रचयन्ति स्म ।

दक्षिण-भारते अष्टमशताब्द्यां परवर्तिकाले च अनेके एतादृशाः सङ्घाः आसन् । तेषु सर्वप्रसिद्धं "मणिग्रामः" "नानादेशी" च आस्ताम् । एतौ वणिक्सङ्घौ प्रायद्वीपे दक्षिणपूर्वेशियया चीनेन च सार्धम् अपि दूरदेशं यावत् वाणिज्यं कुर्वतः स्म । एतदतिरिच्य चेट्टियार-मारवाडी-ओसवालसदृशाः समुदायाः अपि आसन्, ये कालक्रमेण देशस्य प्रधानवणिक्समूहाः जाताः । गुर्जरप्रान्तस्य वणिक्षु हिन्दूवणिजः मुस्लिमबोहरा इति द्वौ

समुदायौ सम्मिलितौ आस्ताम् । एतौ द्वौ समूदायौ सुदूरं रक्तसागरस्य पोताशयेषु, फारसस्य परिखयाम्, पूर्व्याफ्रीकयाम्, दक्षिणपूर्वेशियया‍ं चीने च वाणिज्यं कुर्वतः स्म । ते एतेषु पत्तनेषु वस्त्राणि उपस्काराणि च विक्रीण**न्ते** स्म तेषां च विनिमये अफ्रीकातः सुवर्णं हस्तिदन्तान् अपि च दक्षिण-पूर्वेशियातः चीनतः च उपस्कराणि टिन इति मृत्तिकायाः नीलपात्राणि रजतं च आनयन्ति स्म ।

पश्चिमतटस्य नगरेषु अरबिजनाः फारसिजनाः, चीनिजनाः, यहूद्दिजनाः, सीरियायी-ईसायी-जनाः च अवसन् । रक्तसागरस्य पोताशयेषु विक्रीतानि भारतीयानि उपस्कराणि वस्त्राणि च इतालवि-वणिग्भिः क्रीयन्ते स्म ततः च ते तानि वस्तूनि अग्रे यूरोपीयासु विपणिषु प्रापयन्ति स्म । एतेन वाणिज्येन पर्याप्तः लाभः भवति स्म । उष्णकटिबन्धीये जलवायौ उत्पादितानि उपस्कराणि **यूरोपीय-व्यञ्जनानां** महत्त्वपूर्णानि अङ्गभूतानि आसन् अपि च भारतीयं कार्पासिकं वस्त्रं बह्वाकर्षकं भवति स्म । एतानि वस्तूनि एव यूरोपीयवणिजः भारतं यावत् आकृष्य आनीतवन्ति । कालक्रमेण वाणिज्यस्य नगराणां च रूपं केन प्रकारेण परिवर्तितम्, एतस्मिन् विषये वयं शीघ्रमेव अग्रे पठिष्यामः ।

? यथा भवन्तः अवगन्तुं शक्नुवन्ति, एतस्मिन् कालावधौ जनानां वस्तूनां च गमनागमनं नैरन्तर्येण चलति स्म । भवतां चिन्तनानुसारम् अस्य गमनागमनस्य नगराणां ग्रामाणां च जनजीवनं कथं प्रभावितं जातं स्यात् ? नगरेषु वसतां कर्मकराणां सूचीं कुर्वन्तु ।

## काबुलः

काबुलः (वर्तमानम् अफगानीस्थानम्) षोडशशताब्दीतः स्व-पर्वतीयेण विषम-भू-दृश्येन च राजनीतिक-वाणिज्यिकदृष्टिभ्यां महत्त्वपूर्णः अभवत् । काबुलः कन्धारः च सुप्रसिद्ध-रेशममार्गेण सम्बद्धौ आस्ताम् । एतेन युगपदेव अश्वानां क्रयविक्रयणम् अपि मुख्यरूपेण अनेनैव मार्गेण भवति स्म । सप्तदशशताब्द्यां जौं-बेपटिस्टे-टैवर्नियरः इति कश्चन हीरकाणां वणिक् अनुमानं कृतवान् यत् काबुले प्रतिवर्षम् ३०००० रूप्यकाणाम् अश्वानां क्रयविक्रयणं भवति स्म । इयं तेषु दिनेषु काचित् महती राशिः मन्यते स्म । काबुलतः शुष्कफलानि खर्जूराणि कुथःआस्तरणानि सद्यःपक्वानि (प्रतिनवानि फलानि) ऊष्ट्राणां द्वारा उह्यन्ते स्म अपि च उपमहाद्वीपे तथा च अन्यभागेषु विक्रीयन्ते स्म । एतदतिरिच्य क्रीतदासाः अपि विक्रेतुम् आनीयन्ते स्म ।

## *नगरेषु शिल्पकला*



बीदरस्य शिल्पकाराः ताम्रे रजते च अलङ्करणस्य कार्यार्थम् एतावन्तः अधिकाः प्रसिद्धाः आसन् यत् अस्य शिल्पस्य नाम एव "बीदरी" इति अभवत् । पाञ्चालाः विश्वकर्मासमुदायः च यस्मिन् सुवर्णकाराः कांस्यकाराः लोहकाराः राजशिल्पकाराः काष्ठकाराः च सम्मिलिताः आसन्, मन्दिराणां निर्माणाय आवश्यकाः आसन् । एतदतिरिच्य ते राजप्रसादानां बृहद्-भवनानां जलाशयानां तडागानां च निर्माणकार्ये अपि स्वीयां महत्त्वपूर्णां भूमिकां निर्वहन्ति स्म । अनेन एव प्रकारेण सालियारसदृशाः अथवा कैक्कोलारसदृशाः तन्तुवायाः अपि समृद्धशालिनः समुदायाः जाताः अपि च ते मन्दिरेभ्यः प्रचुरं दानं दक्षिणां च यच्छन्ति स्म । वस्त्रनिर्माणसम्बद्धानि कानिचन अन्यानि कार्याणि यथा कार्पासस्य स्वच्छीकरणम्, सूत्रनिर्माणं तथा च रञ्जनम् अपि स्वतन्त्रव्यवसायाः जाताः आसन्, येषां कृते विशेषज्ञतायाः आवश्यकता भवति स्म ।

**चित्रम् – ४**

***पीतलस्य एतस्मिन् सिक्थवर्तिकाधाने कृष्णावरणम् अस्ति ।***



चित्रम -५ उर्णवस्त्रस्य प्रान्तभागः

चित्रम् -६

हम्प्यः जलाशयस्य त्रुटितभित्तेः बुर्ज इत्यस्य दृश्यम् ।

## नगराणां परिवर्तमानं भाग्यम्

अनेकाभिः शताब्दीभिः अहमदाबादसदृशानि (गुर्जरे) कानिचन नगराणि बृहद्-वाणिज्यकेन्द्रेषु विकसितानि जातानि, परन्तु तंजावूरसदृशानि कानिचन अन्यानि नगराणि पूर्वकालस्य अपेक्षया विस्तारस्य महत्त्वस्य च दृष्ट्या सङ्कुचितानि जातानि । एतस्मिन् काले पश्चिमबङ्गाले भागीरथीनद्याः तटे स्थितः मुर्शिदाबादः (वर्तमाननाम) कौशेयवस्त्राणां प्रमुखकेन्द्रस्य रूपेण विकसितः जातः । इदं स्थानम् १७०४ तमे वर्षे बङ्गालस्य राजधानी अभवत् परन्तु एतस्यां शताब्द्याम् एव अस्य भाग्यं अस्तं जातम्, यतोहि तत्रत्याः तन्तुवायाः इङ्गलैण्डदेशस्य वस्त्राणाम् उद्योगेभ्यः आगतैः अमहर्घवस्त्रैः सह स्पर्धां कर्तुं न शक्तवन्तः ।

## *हम्पी, मसूलीपट्टनं सूरतश्च – समीपतः दृष्टिपातः*

### *हम्पी इत्यस्य वास्तुकलायाः सौन्दर्यम्*

हम्पीनगरं कृष्णा-तुङ्गभद्रयोः उपत्यकासु स्थितम् अस्ति । इदं नगरं 1336 तमे वर्षे स्थापितस्य विजयनगरसाम्राज्यस्य केन्द्रस्थलम् आसीत् । हम्प्यः उत्तमैः भवनावशेषैः ज्ञायते यत् तस्य नगरस्य दुर्गबन्धनम् उच्चकोट्याः आसीत् । दुर्गस्य भित्तीनां निर्माणे कुत्रापि लेप-श्वेताश्मचूर्णसदृशस्य योजकपदार्थस्य प्रयोगः न कृतः आसीत् शिलाखण्डाः च परस्परं योजयित्वा ग्रथिताः आसन् ।



## एकं दुर्गबद्धं नगरम्

कश्चन पुर्तगाली यात्री डोमिंगो-पेजः षोडशशताब्द्यां हम्पीनगरस्य वर्णनम् अनेन प्रकारेण कृतवान् –

... गोवातः आगन्तारः जनाः यस्मात् प्रवेशद्वारात् आगच्छन्ति तस्य द्वारस्य अन्तः राजा एकम् अत्यन्तं सुदृढं प्राचीरबद्धं नगरं रचितवान् अस्ति, यत् भित्तिभिः अट्टैः च सुरक्षितम् अस्ति । एताः भित्तयः अन्यनगरस्य भित्तिसदृशाः न सन्ति, परन्तु अत्यधिकस्य राजगीरी इत्यस्याः एतादृशम् उदाहरणम् अस्ति, यत् अन्येषु भागेषु विरलतया एव द्रष्टुम् उपलप्स्यते । तस्य अन्तः तया रीत्या निर्मितभवनानाम् अत्यन्तसुन्दरपङ्क्तयः सन्ति येषां छदयः समतलाः सन्ति ।

? भवतां विचारेण एतदेव नगरं दुर्गबन्धितं किमर्थम् आसीत् ?

हम्प्यः वास्तुकला बहु विशिष्टा आसीत् । अत्रत्येषु राजसभवनेषु भव्यतोरणानि मन्दिरमुकुटानि च आसन् । तत्र स्तम्भयुक्ताः अनेके विशालकक्षाः आसन्, येषु प्रतिमानां स्थापनार्थं स्थानानि निर्मितानि आसन् । तत्र सुनियोजितानि उद्यानानि पुष्पवाटिकाः च अपि आसन्, येषु कमल-टोडाकृतियुक्ताः मूर्तिकलायाः प्रारूपाणि आसन् । पञ्चदश-षोडश-शताब्द्योः हम्पीनगरं स्व-समृद्धिकाले अनेकाभिः वाणिज्यिकसांस्कृतिकाभिः गतिविधिभिः स्वोत्कर्षे आसीत् । तत्कालस्य हम्पीनगरस्य विपणिषु यवनवणिजां चेट्टि-पुर्तगालिसदृशानां च यूरोपस्य वणिजां प्रतिनिधीनां प्राचुर्येण उपस्थितिः भवति स्म ।

*चित्रम् -७*

*हम्प्यः विठ्ठलमन्दिरस्य पाषाणनिर्मितः रथः*



मन्दिराणि सांस्कृतिकगतिविधीनां केन्द्राणि भवन्ति स्म अपि च देवदास्यः विरूपाक्षमन्दिरस्य अर्थात् शिवमन्दिरस्य अनेकस्तम्भयुक्तेषु विशालकक्षेषु देवप्रतिमानां राज्ञां प्रजाजनानां च समक्षं नृत्यन्ति स्म । महानवमीपर्वः यत् अद्यत्वे दक्षिणे नवरात्रपर्व इति उच्यते, तेषु दिनेषु हम्प्यां किमपि एकं महत्त्वपूर्णं पर्वः मन्यते स्म । पुरातत्त्वविदः तं महानवमीमञ्चम् अन्विष्टवन्तः, यत्र

राजा स्वस्य अतिथीनां स्वागतं सत्कारं च करोति स्म अधीनस्थजनेभ्यः च नजराने-उपहारान् स्वीकरोति स्म । तत्रैव उपविश्य राजा नृत्यं सङ्गीतं मल्लयुद्धं च इत्येतादृशान् कार्यक्रमान् अपि पश्यति स्म ।

१५६५ तमे वर्षे दक्षिणस्य सम्राड्भिः अर्थात् गोलकुंडायाः बीजापुरस्य अहमदनगरस्य बरारस्य बीदरस्य च शासकैः विजयनगरस्य पराजयानन्तरं हम्प्यः विनाशः अभवत् ।

**वाणिज्यकेन्द्रम्**

*किञ्चन एतादृशं स्थानं यत्र विभिन्नोत्पादनकेन्द्रेभ्यः आगतवस्तूनि क्रीयन्ते विक्रीयन्ते च ।*

## सूरतनगरम् इति पश्चिमस्य प्रवेशद्वारम्

सूरतनगरं मुगलकाले कैम्बे (अद्यतनस्य खम्बात) इत्यस्य किञ्चित् कालानन्तरं च अहमदाबादेन सार्धं गुर्जरप्रान्ते पश्चिम-क्रयविक्रयस्य किमपि प्रमुखं वाणिज्यकेन्द्रं जातम् । सूरतनगरम् ओरमुजस्य खातः भूत्वा पश्चिम्येशियया सार्धं वाणिज्यं कर्तुं किमपि मुख्यद्वारम् आसीत् । सूरतं मक्कायाः प्रस्थानद्वारम् अपि उच्यते, यतोहि बहवः हजयात्रिणः जलयानेन इतः एव प्रस्थानं कुर्वन्ति स्म ।

सूरतं किमपि एकं सर्वदेशीयं नगरम् आसीत्, यत्र सर्वेषां धर्माणां जातीनां च जनाः निवसन्ति स्म । सप्तदशशताब्द्यां तत्र पुर्तगालिजनानां डचजनानाम् आङ्गलीयानां च यन्त्रगाराः वस्तुभाण्डारगृहाणि च आसन् । ओविंगटन इति कश्चन आङ्गलीयः इतिहासकारः १६८९ तमे वर्षे सूरतस्य पोताशयस्य वर्णनं कुर्वन् लिखितवान् अस्ति यत् कस्मिंश्चित् अपि काले एतस्मिन् पोताशये विभिन्नदेशानां सामान्यतः शतं नौबन्धनकीलाः जलपोताः स्थिताः द्रष्टुं शक्यन्ते स्म ।

**हुंडी इति**

*हुंडी कश्चन एतादृशः अभिलेखः यस्मिन् एकेन जनेन निहितराशिः अङ्किता भवति । हुंडीं कुत्रचित् अन्यत्र प्रस्तूय निहितराशिं प्राप्तुं शक्यते ।*

सूरते एतादृशाः अनेके आपणाः आसन् येषु अल्पमात्रायां प्रचुरमात्रायां च कार्पासिकवस्त्रं क्रमशः अधिकमूल्येन अल्पमूल्येन च विक्रीणन्ते स्म । सूरतस्य वस्त्राणि स्वसुवर्णमयाय प्रान्तभागाय प्रसिद्धाः आसन् तथा च तेषां कृते पश्चिमेशियायाम् अफ्रीकायां यूरोपे च आपणाः उपलब्धाः आसन् । राज्ये विश्वस्य विधिध-भागेभ्यः नगरं प्रति आगन्तॄणां जनानाम् आवश्यकताः पूरयितुम् अनेकेषां विश्रामगृहाणां निर्माणं कृतम् आसीत् । तत्र असङ्ख्यकानि भव्यभवनानि मनोरञ्जनस्थलानि च आसन् । सूरते काठियावाडिश्रेष्ठिनां महाजनानां च महान्तः धनव्यवसायसमूहाः आसन् । उल्लेखनीयम् अस्ति यत् सूरतेन निर्मितानां हुण्डि इत्येतासां दूरदेशं यावत् यथा मिस्रे काहिरायाः, इराके बसरायाः तथा च बेल्जियमे एंटवर्प इत्यस्य विपणिषु मान्यता आसीत् । परन्तु, सप्तदशशताब्द्याः अन्तिमेषु वर्षेषु सूरतस्य अपि अपकर्षः प्रारब्धः । एतस्य बहूनि कारणानि आसन्, मुगलसाम्राज्यस्य पतनस्य कारणतः विपणीनाम् उत्पादकतायाः च हानिः, पुर्तगालिजनैः समुद्रसम्बद्धमार्गेषु

नियन्त्रणं स्थापितम् आसीत् अपि च बम्बयी इत्यनेन प्रतिस्पर्धा आसीत् यत्र १६६८ तमे वर्षे आङ्गलीयेन ईस्ट-ईंडिया-समूहेन स्वस्य मुख्यालयः स्थापितः आसीत् । अद्य सूरतं किञ्चन वाणिज्यिककेन्द्रम् अस्ति।

### सङ्कटकालः, मसूलीपट्टनमस्य कृते आह्वानम्

मसूलीपट्टनम् अथवा मछलीपट्टनम् इति नगरं कृष्णानद्याः नदीमुखपुलीने स्थितम् अस्ति। सप्तदशशताब्द्याम् इदं विभिन्नानां गतिविधीनां केन्द्रम् आसीत्।

हालैण्ड-इङ्ग्लैण्डदेशयोः ईस्ट-इण्डिया-समूहाः मसूलीपट्टनं नियन्त्रयितुं प्रयत्नं कृतवन्तः यतोहि तावत्पर्यन्तं तत् आन्ध्रतटस्य महत्तरं पत्तनं जातम् आसीत् । मसूलीपट्टनमस्य दुर्गं हालैण्डवासिनः निर्मितवन्तः आसन्।

#### मत्स्यपालकानां कश्चित् विपन्ननगरम्

आङ्गलीयेष्ट-इण्डिया-समूहस्य केनचित् प्रतिनिधिना विलियम मेथवल्डवर्येण 1620 तमे ख्रिस्ताब्दे एतैः शब्दैः मसूलीपट्टनमस्य वर्णनं कृतं आसीत्।

इदं गोलकुण्डायाः मुख्यं पत्तनम् अस्ति यत्र परमपूज्यः ईस्ट-इण्डिया-समूहः (कम्पनी) स्वाभिकर्तारं नियोजयति । इदं लघुनगरम् अस्ति, परन्तु सघनरूपेण अधिवसितम् अस्ति, प्राकारं विना च तस्य नगरस्य निर्माणं अनुचितप्रकारेण जातम् अस्ति । एतत् नगरं शोभने स्थाने न अस्ति। एतस्य नगरस्य सर्वाणि जलस्रोतांसि लावणिकस्य जलस्य सन्ति । पूर्वम् एतत् विपन्नमत्स्यपालकानां नगरम् आसीत् । कालक्रमेण अत्र जलयानानां स्थगनस्य व्यवस्था जाता यतः वणिजः अत्र अवसन् यतोहि अस्माकं तथा च हालैण्डस्य निवासिनः अत्र गमनागमनं कुर्वन्ति स्म अतः इदं नगरं तेषां कृते निवासस्य व्यवस्थां करोति स्म।

? आङ्गलीयैः हालैण्डवासिभिः च मसूलीपट्टनमे स्वनिवासस्थापनस्य निर्णयः किमर्थं स्वीकृतः ?

**प्रतिनिधयः:**

ईस्ट-इण्डिया-समूहस्य वाणिज्य-गतिविधीनां नियुक्तः अधिकारी

गोलकुण्डायाः कुत्बशाहिनः शासकाः वस्त्राणाम् उपस्कराणाम् अन्यवस्तूनां च विक्रयणे राजसम् एकाधिकारम् अनुवर्तितवन्तः, यतः तत्रत्यं वाणिज्यं सर्वथा ईस्ट-इण्डिया-समूहस्य (कम्पनी) अधीनं न गच्छेत्। विभिन्नानां वाणिज्यसमूहानां-

गोलकुण्डानां च कुलीनवर्गैः फारसिवणिजः तेलगु-जनैः कोमेटी-जनैः चेट्टियर-जनैः यूरोपीयवणिग्भिः नगरं सघनजनसङ्ख्यायुक्तं समृद्धशालि च कृतम् । यदा मुगलैः गोलकुण्डां यावत् स्वशक्तेः विस्तारः कृतः तदा तेषां प्रतिनिधिः प्रान्ताधिपतिः मीरजुमलावर्यः यः स्वयं कश्चन एकः वणिक् आसीत् तेन हालैण्डवासिनः आङ्गलीयाः च परस्परं युद्धं कर्तुं सज्जीकारिताः । 1686-87 तमयोः वर्षयोः मुगलसम्राजेन औरंगजेबेन गोलकुण्डा स्वमुगलसाम्राज्ये संमेलितः ।

अधुना यरोपीयानाम् उद्योगसमूहानां पार्श्वे अन्यविकल्पस्य अन्वेषणस्य समस्या उपस्थिता । समूहस्य नूतननीत्यन्तर्गतं केवलम् एतावत् एव पर्याप्तं न आसीत् यत् पत्तनेन अन्तर्भूतप्रदेशस्य उत्पादनस्य केन्द्रैः सह सम्बन्धस्य स्थापनं स्यात् । परन्तु एतस्य तथ्यस्य अपि आवश्यकता अनुभूता यत् ईस्ट-इण्डिया-समूहस्य नूतनानि वाणिज्यकेन्द्राणि सार्धम् एव राजनीतिकां प्रशासनिकीं भूमिकायाः वाणिज्यिकीं च भूमिकाम् अपि निर्वहेयुः । यदा समूहस्य वाणिजः मुम्बयीनगरं कोलकातानगरं मद्रासं च गतवन्तः, तदा मसूलीपट्टनस्य स्वीयं वाणिज्यं वैभवं च नष्टम् अभवत् । अपि च अष्टादशशताब्द्याः कालावधौ तस्य अपकर्षः अभवत् अद्य तत् किमपि लघुनगरम् अतिरिच्य किमपि नास्ति ।

## *नूतनानि नगराणि व्यापारिणः च*

षोडश-सप्तदश-शताब्द्योः यूरोपीयाः देशाः व्यापारिकोद्देश्यैः उपस्कराणां वस्त्राणां च अन्वेषणे संलग्नाः आसन्, ये यानि यूरोप-पश्चिमेशिययोः द्वयोः स्थानयोः लोकप्रियानि । आङ्गलीयाः हालैण्डवासिनः फ्रांसीसिजनाः पौर्वेषु देशेषु स्ववाणिज्यिकगतिविधीनां विस्तारं कर्तुं स्वस्य स्वस्य ईस्ट-इण्डिया-समूहानां स्थापनां कृतवन्तः । प्रारम्भे तु मुल्ला-अब्दुल-गफूर-वीरजीवोरासदृशाः महान्तः भारतीय-वणिजः येषां पार्श्वे पर्याप्तसङ्ख्यायां जलपोताः आसन् तेषां सम्मुखीकरणं कृतवन्तः । किन्तु यूरोपीयसमूहाः सामुद्रिके वाणिज्ये स्वनियन्त्रणं स्थापयितुं स्वस्य नौशक्तेः प्रयोगं कृतवन्तः अपि च यूरोपीयसमूहेन भारतीयवणिजः स्वप्रतिनिधिरूपेण कार्यं कर्तुं बाध्याः कृताः । अन्ततः आङ्गलीयाः उपमहाद्वीपे सर्वाधिकसफल-वाणिज्यिकरूपेण अपि च राजनैतिकशक्तेः रूपेण विकसिताः जाताः ।

वस्त्रसदृशानां वस्तूनाम् अभियाचनायां वृद्धौ सत्याम् अधिकतराः जनाः वयन-कर्तन-धावन-रञ्जनादीनां कार्याणाम् आरम्भं कृतवन्तः । एतेन कार्येण एतेषां शिल्पानां महान् विस्तारः जातः । भारतीयानां वस्त्राणां रूपं वर्णः आकृतिः च आधिक्येन परिष्कृता जाता किन्तु अस्मिन् काले शिल्पकाराणां स्वतन्त्रतायां न्यूनता जाता ।

शिल्पिनः प्राग्दत्तमूल्यस्य प्रणाल्यां कार्यं कर्तुम् आरब्धवन्तः, यस्य अर्थः अयम् आसीत् यत् ते यूरोपीयाभिकर्तृभ्यः पूर्वमेव प्राग्दत्तमूल्यं स्वीकृतवन्तः आसन् तेषां कृते एव तैः वस्त्रस्य वयनं करणीयं भवति स्म । अधुना तन्तुवायाः स्ववस्त्रस्य वयनस्य आकृतीः विक्रेतुं स्वतन्त्राः न आसन् । तैः तु समूहस्य प्रतिनिधिभिः निर्धारिताकृत्याः अनुसारम् एव अपि च तेषाम् अभियाचनायाः अनुसारम्, एव वस्त्राणां वयनं करणीयं भवति स्म ।

अष्टादशशताब्द्यां मुम्बयीनगरस्य कोलकातानगरस्य मद्रासनगरस्य च उदयः अभवत्, एतानि अद्यत्वे प्रमुखाणि महानगराणि सन्ति । शिल्पकलायां वाणिज्ये च महान्ति परिवर्तनानि आगतानि । तन्तुवायसदृशाः शिल्पिनः तथा च वणिजः यूरोपीयसमूहैः स्थापितेषु एतेषु नूतननगरेषु "ब्लैक-टाउन्स" इत्याख्येषु स्थानान्तरिताः जाताः । ब्लैक इति अर्थात् स्वदेशीवणिजः अपि च शिल्पकाराः एतेषु "ब्लैकटाउन्साख्येषु सीमिताः कृताः, परन्तु श्वेतशासकाः मद्रासे फोर्ट-सेंट-जार्ज इति अपि च कोलकातायां फोर्ट-सेन्ट-विलियम इति भव्यभवनेषु स्वावासान् निर्मितवन्तः । अष्टादशशताब्द्यां शिल्पकलानां वाणिज्यस्य च कथां वयम् अग्रिमे वर्षे पठिष्यामः ।

***अष्टमं चित्रम्***

*प्रारम्भिकेकोनविंशत्यां शताब्द्यां मुम्बयीमहानगरस्य कश्चित् राजमार्गः ।*



अन्यत्र

## वास्को-डि-गामा क्रिस्टोफर-कोलम्बसः च



*चित्रम् – ९, वास्को-डि-गामा*

पञ्चदशशताब्द्यां यूरोपीयनाविकैः सामुद्रिकमार्गानाम् अन्वेषणसम्बन्धीनि अभूतपूर्वाणि कार्याणि कृतानि । तेषु अधिकतमाः नाविकाः भारतीयोपमहाद्वीपं प्राप्तुं कश्चित् मार्गः स्यात् इति अन्वेषणेन उपस्कराणां च प्राप्तिः स्यात् इति इच्छया प्रेरिताः आसन् । पुर्तगालिनाविकः वास्को-डि-गामा अटलान्टिकस्य महासागरस्य यात्रां कुर्वन् केप-आफ-गुड-होपतः निर्गत्य हिन्दमहासागरं च पारं कृत्वा भारतं प्राप्तवान् । सः एकवर्षात् अपि न्यूनेन काले स्वकीयां प्रथमां यात्रां पूर्णां कृतवान् । सः १४९८ तमे वर्षे कालीकटम् (केरलम्) प्राप्तवान् ततः अग्रिमे वर्षे सः पुर्तगालस्य राजधानीं लिस्बनं प्रत्यागतवान् । एतस्याः सामुद्रिकयात्रायाः समये तस्य चतुर्षु जलपोतेषु द्वौ जलपोतौ नष्टौ जातौ अपि च १७० यात्रिषु केवलं ५४ यात्रिणः एव जीविताः अवशिष्टाः आसन् । एतासां प्रत्यक्षासु आपत्तिषु सतीषु ये मार्गाः अन्विष्टाः उद्घाटिताः वा ते अत्यन्तं लाभप्रदाः जाताः तदनन्तरं तु आङ्गलीयैः हालैण्डवासिभिः फ्रांसीसिभिः अपि तेषाम् अनुसरणं प्रारब्धम् । भारतं प्राप्तुं सामुद्रिकमार्गाणाम् अन्वेषणस्य कश्चित् अन्यः अचिन्तितः सुपरिणामः अपि आगतः यस्मिन् विषये कस्य अपि आशा न आसीत् । कश्चित् इटलीवासी क्रिस्टोफर-कोलम्बसः भारतं प्रति आगन्तुं मार्गान्वेषणाय अटलांटिकं महासागरं पारं कृत्वा पश्चिमं प्रति यात्रां कर्तुं निश्चितवान् । तस्य चिन्तनम् आसीत् यत् पृथिवी गोलाकारा अस्ति अतः सः पश्चिमतः अपि भारतं प्रति आगन्तुं शक्नोति । सः १४९२ तमे वर्षे वेस्टइंडीज इत्यस्य तटं प्राप्तवान् । (बेस्ट-इंडीज इति नाम एतस्याः एव भ्रान्त्याः कारणेन अभवत् ।) क्रिस्टोफर-कोलम्बसस्य अनन्तरं स्पेनस्य पुर्तगालस्य च नाविकाः विजेतारः अपि अत्र नैरन्तर्येण आगतवन्तः अपि च ते मध्यदक्षिणामेरिकायाः महत्सु भागेषु स्वाधिपत्यं कृतवन्तः प्रायः ते तत्रत्यनिवासान् नष्टवन्तः ।

### कल्पनां कुर्वन्तु



*भवन्तः सप्तदशशताब्द्यां सूरततः पश्चिमेशियायाः यात्रां कर्तुं योजनां रचयन्तः सन्ति । एतदर्थं भवन्तः कीदृशीं सज्जां करिष्यन्ति ?*

## पुनः स्मरन्तु

१ रिक्तस्थानानि पूरयन्तु ---

(क) राजराजेश्वरमन्दिरं ------- निर्मितम् आसीत् ।
(ख) अजमेर-सूफी-संतः -------- सम्बद्धः अस्ति ।
(ग) हम्पी ------ साम्राज्यस्य राजधानी आसीत् ।
(घ) हालैण्डवासिनः आन्ध्रप्रदेशे ----- स्वग्रामं निर्मितवन्तः ।

२ ज्ञापयन्तु किं सत्यं किं च असत्यम् अस्ति -

(क) वयं राजराजेश्वरमन्दिरस्य मूर्तिकारस्य (स्थपतेः) नाम केनचित् शिलालेखेन जानीमः ।

(ख) वणिजः समूहेषु यात्राम् अकृत्वा एकाकिनः यात्रां कर्तुम् इच्छन्ति स्म ।

(ग) काबुलः हस्तिवाणिज्यस्य प्रमुखं केन्द्रम् आसीत् ।

(घ) सूरतनगरं बङ्गालस्य आखाते स्थितं किञ्चन वाणिज्यपत्तनम् आसीत् ।

३ तंजावूरनगराय जलस्य आपूर्तिः कथं क्रियते स्म ?

४ मद्रासमदृशेषु महानगरेषु स्थितेषु "ब्लैक-टाउन्स" इत्येतेषु कः निवसति स्म ?

## आगच्छन्तु अवगच्छामः

५ भवतां विचारेण मन्दिराणां समीपस्थेषु स्थानेषु नगराणि किमर्थं विकसितानि ?

६ मन्दिराणां निर्माणार्थं तेषां संरक्षणार्थं च शिल्पिनः कियन्तः महत्त्वपूर्णाः आसन् ?

**बीज-शब्दः**

मन्दिरम् ,

नगरम्,

नगरीकरणम्,

विश्वाकर्मा,

वाणिज्यकेन्द्रम्,

ब्लैक-टाउन अर्थात् कृष्णनिवासः ।

७ जनाः दूरस्थेभ्यः प्रदेशेभ्यः सूरतनगरं प्रति किमर्थम् आयान्ति स्म ?

८ कोलकातासदृशेषु नगरेषु शिल्पोत्पादनं तंजावूरसदृशानां नगराणाम् अपेक्षया केन प्रकारेण भिन्नम् आसीत् ?

## आगच्छन्तु विचारयामः

९ अस्मिन् अध्याये वर्णितस्य कस्यचित् एकस्य नगरस्य तुलनां भवन्तः स्वपरिचितेन केनापि नगरेण सह अथवा ग्रामेण सह कुर्वन्तु ? किं द्वयोः मध्ये काचित् समानता अथवा किञ्चिन् अन्तरम् अस्ति ?

१० वणिग्भिः कासां कासां समस्यानां सम्मुखीकरणं करणीयं भवति स्म ? भवतां विचारेण किम् अद्य अपि तादृश्यः काश्चन समस्याः विद्यमानाः सन्ति ?

## आगच्छन्तु कृत्वा पश्यामः

११ तंजावूरस्य अथवा हम्प्यः वास्तुशिल्पस्य विषये काञ्चित् अधिकां सूचनां प्राप्नुवन्तु अपि च एतेषां नगराणां मन्दिराणां भवनानां च चित्राणां साहाय्येन कस्यचित् स्क्रैपबुक इत्यस्य सज्जीकरणं कुर्वन्तु ।

१२ कस्यचित् वर्तमानतीर्थस्थानस्य ज्ञानं कुर्वन्तु । वदन्तु यत् जनाः तत्र किमर्थं गच्छन्ति, तत्र किं कुर्वन्ति, किं तस्य केन्द्रस्य समीपस्थेषु स्थानेषु आपणाः सन्ति तत्र च किं विक्रीयते क्रीयते च ?